# Sanjayaproktam Shri Krishnamahimavarnanam

# સઞ્જયપ્રોક્તં શ્રીકૃષ્ણમહિમાવર્ણનમ્

## Document Information

Text title : Sanjayaproktam Shri Krishnamahimavarnanam

File name : sanjayaproktaMshrIkRRiShNamahimAvarNanam.itx

Category : vishhnu, vishnu, krishna, mahAbhArata

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | udyogaparva | adhyAya 68/3-14||

Latest update : October 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2025

*sanskritdocuments.org*

# સઞ્જયપ્રોક્તં શ્રીકૃષ્ણમહિમાવર્ણનમ્

ધૃતરાષ્ટ્ર ઉવાચ ।
ભૂયો મે પુણ્ડરીકાક્ષં સઞ્જયાચક્ષ્વ પૃચ્છતે ।
નામકર્માર્થવિત્તાત પ્રાપ્નુયાં પુરુષોત્તમમ્ ॥ ૧॥

સઞ્જય ઉવાચ ।
શ્રુતં મે તસ્ય દેવસ્ય નામનિર્વચનં શુભમ્ ।
યાવત્તત્રાભિજાનેઽહમપ્રમેયો હિ કેશવઃ ॥ ૨॥

વસનાત્સર્વભૂતાનાં વસુત્વાદ્દેવયોનિતઃ ।
વાસુદેવસ્તતો વેદ્યો વૃષત્વાદ્વૃષ્ણિરુચ્યતે ॥ ૩॥

મૌનાદ્ધ્યાનાચ્ચ યોગાચ્ચ વિદ્ધિ ભારત માધવમ્ ।
સર્વતત્ત્વલયાચ્ચૈવ મધુહા મધુસૂદનઃ ॥ ૪॥

કૃષિર્ભૂવાચકઃ શબ્દો ણશ્ચ નિર્વૃતિવાચકઃ ।
કૃષ્ણસ્તદ્ભાવયોગાચ્ચ કૃષ્ણો ભવતિ શાશ્વતઃ ॥ ૫॥

પુણ્ડરીકં પરં ધામ નિત્યમક્ષયમક્ષરમ્ ।
તદ્ભાવાત્પુણ્ડરીકાક્ષો દસ્યુત્રાસાજ્જનાર્દનઃ ॥ ૬॥

યતઃ સત્ત્વં ન ચ્યવતે યચ્ચ સત્ત્વાન્ન હીયતે ।
સત્ત્વતઃ સાત્ત્વતસ્તસ્માદાર્ષભાદ્વૃષભેક્ષણઃ ॥ ૭॥

ન જાયતે જનિત્ર્યાં યદજસ્તસ્માદનીકજિત્ ।
દેવાનાં સ્વપ્રકાશત્વાદ્દમાદ્દામોદરં વિદુઃ ॥ ૮॥

હર્ષાત્સૌખ્યાત્સુખૈશ્વર્યાદ્ધૃષીકેશત્વમશ્નુતે ।
બાહુભ્યાં રોદસી બિભ્રન્મહાબાહુરિતિ સ્મૃતઃ ॥ ૯॥

અધો ન ક્ષીયતે જાતુ યસ્માત્તસ્માદધોક્ષજઃ ।
નરાણામયનાચ્ચાપિ તેન નારાયણઃ સ્મૃતઃ ।

પૂરણાત્સદનાચ્ચૈવ તતોઽસૌ પુરુષોત્તમઃ ॥ ૧૦॥

અસતશ્ચ સતશ્ચૈવ સર્વસ્ય પ્રભવાપ્યયાત્ ।
સર્વસ્ય ચ સદા જ્ઞાનાત્સર્વમેનં પ્રચક્ષતે ॥ ૧૧॥

સત્યે પ્રતિષ્ઠિતઃ કૃષ્ણઃ સત્યમત્ર પ્રતિષ્ઠિતમ્ ।
સત્યાત્સત્યં ચ ગોવિન્દસ્તસ્માત્સત્યોઽપિ નામતઃ ॥ ૧૨॥

વિષ્ણુર્વિક્રમણાદેવ જયનાજ્જિષ્ણુરુચ્યતે ।
શાશ્વતત્વાદનન્તશ્ચ ગોવિન્દો વેદનાદ્ગવામ્ ॥ ૧૩॥

અતત્ત્વં કુરુતે તત્ત્વં તેન મોહયતે પ્રજાઃ ।
એવંવિધો ધર્મનિત્યો ભગવાન્મુનિભિઃ સહ ।
આગન્તા હિ મહાબાહુરાનૃશંસ્યાર્થમચ્યુતઃ ॥ ૧૪॥

ઇતિ મહાભારતે ઉદ્યોગપર્વણિ ૬૮ અધ્યાયાન્તર્ગતં
સઞ્જયપ્રોક્તં શ્રીકૃષ્ણમહિમાવર્ણનં સમ્પૂર્ણમ્ ।

મહાભારત । ઉદ્યોગપર્વ । અધ્યાય ૬૮/૩-૧૪॥

mahAbhArata . udyogaparva . adhyAya 68/3-14..

Proofread by PSA Easwaran

---

*Sanjayaproktam Shri Krishnamahimavarnanam*
pdf was typeset on October 18, 2025

Please send corrections to *sanskrit@cheerful.com*